श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमन्निगमान्तमहादेशिकैरनुगृहीताः

# ॥ श्रीदिव्यदेशमङ्गळाशासनश्लोकाः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीदिव्यदेशमङ्गळाशासनश्लोकाः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

## श्री सारसारम् ( श्रीरङ्गम् )

विधिविहितसपर्यां वीतदोषानुषङ्गाम्
उपचितधनधान्यामुत्सवैः स्त्यानहर्षाम्।
स्वयमुपचिनु नित्यं रङ्गधामन् स्वरक्षां
शमितविमतपक्षां शाश्वतीं रङ्गलक्ष्मीम्॥ 1॥

## श्री रहस्यनवनीतम् ( वेङ्कटाद्रिः )

प्रशमितकलिदोषां प्राज्यभोगानुबन्धां
समुदितगुणजातां सम्यगाचारयुक्ताम्।
श्रितजनबहुमान्यां श्रेयसीं वेङ्कटाद्रौ
श्रियमुपचिनु नित्यं श्रीनिवास त्वमेव॥ 2॥

## श्री तत्वनवनीतम् ( काञ्चीपुरम् )

वरद विरचय त्वं वारिताशेषदोषां
पुनरुपचितपुण्यां भूषितां पुण्यकोट्या।
सितमुदितमनोभिस्तावकैर्नित्यसेव्यां
हतरिपुजनयोगां हस्तिधाम्नः समृद्धिम्॥ 3॥

## तिरुनारायणपुरम्

नवनवबहुभोगां नाथ नारायण त्वं
    विरचय दुरितौघैस्तामनाघ्रातगन्धाम्।
सहजसुलभदास्यैः सद्भिरभ्यर्थनीयां
    यतिपरिबृढहृद्यां यादवाद्रेः समृद्धिम्॥ 4॥

## श्री रहस्यपदवी

श्रीरङ्गद्विरदवृषाद्रिपूर्वकेषु
    स्थानेषु स्थिरविभवा भवत्सपर्या।
आकल्पं वरद विधूतवैरिपक्षा
    भूयस्या भवदनुकम्पयैव भूयात्॥ 5॥

॥ श्रीदिव्यदेशमङ्गळाशासनश्लोकाः समाप्ताः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

sunder kidambi prapatti dot com sunder kidambi